# श्रीमद् भागवत रसिक कुटुंब

## श्रीजगन्नाथनवकम्

पारावारपतिः(फ्) पुरीपुरपतिस्सौभाग्यलक्ष्मीपतिः(श्)
श्रीक्षेत्राधिपतिर्महेश्वरपतिर्मायापतिर्भूपतिः ।
श्रीवैकुण्ठपतिर्जगज्जनपतिर्माधुर्यलीलापतिः
दारुब्रह्मपतिर्महामखपतिः(ख्) कुर्यात्सदा मङ्गलम् ॥ 1॥

हे नारायण हे जगज्जयकृते, हे विश्वबन्धो प्रभो,
हे वैकुण्ठसनातन ग्रहपते हे रामनारायण ।
हे नीलाचलनायक प्रवण हे हे श्रीजगन्नाथ मां(म्),
हे राधाधव पाहि पाहि सततं(वँ) वन्दामि नन्दात्मजम् ॥ 2॥

गोलाकाराक्षयुक्ता निखिलमणिमयी हेमभूषाङ्गशोभा,
श्यामा कामाभिरामा स्वजनसहरता प्रेमधारावहन्ती ।
या सा सं(म्)सारसारा श्रितजनविषया ब्रह्मरूपा प्रसन्ना
पायात्सं(म्)भ्रान्तनीलाचलभुवनसुखा स्रग्धरा दारुमूर्तिः ॥ 3॥

स्वर्णालं(ङ्)कृतदिव्यदारुरसिकं(म्) श्रीमन्दिराधीश्वरं(वँ),

विश्वानन्दतनुं(वँ) विकाररहितं(म्) पुर्य्यां(म्) महासौरभम् ।
भक्तिप्रेमधनं(न्) ददाति परमं(लँ) लावण्यलक्ष्मीजुषं(म्)
श्रीनीलाद्रिमहोदयं(म्) प्रतिदिनं(म्) सौन्दर्यसारं(म्) भजे ॥ 4॥

पक्षीन्द्रासीनमञ्चं(म्) सकलमणियुतं(यँ) योगमायासमेतं(म्)
शङ्खं(ञ्) चक्रं(ङ्) गदाब्जं(म्) प्रबलबलयुतं(म्) बाहुभिः(स्) सं(न्)दधानम् ।
लावण्यं(म्) मर्त्यलोके नयनसुखकरं(म्) पीतपट्टाम्बराढ्यं(लँ)
लक्ष्मीनारायणाख्यं(न्) निरुपमयुगलं(न्) दिव्यदेहं(न्) नमामि ॥ 5॥

माधुर्यसाररससारसुखैकसारं(वँ),
वेदान्तसारसुरसारविदग्धसारम् ।
पीयूषसारघनसारसुशीतसारं(म्),
श्रीक्षेत्रसारहरिसारसुसारमीडे ॥ 6॥

शुद्धं(म्) बुद्धमबद्धमव्ययमजं(न्) दान्तं(म्) प्रशान्तं(म्) महः(ख्),
कान्तं(म्) सन्ततमन्तकारिमनघोदन्तं(म्) महान्तं(म्) परम् ।
नित्यं(न्) निर्मलमेकमाद्यमजडं(म्) सत्यावबोधात्मकं(वँ),
वन्दे तं(ङ्) कमलापतिं(म्) प्रतिदिनं(न्) नीलाद्रिचूडामणिम् ॥ 7॥

हे शीतल प्रियहरे करुणावतार,
सौभाग्यदारुसुखकारुकलाभितप्त ।
श्रीमन्दिरेश नितरां(न्) तुलसीदलेऽस्मिन्,
पत्रं(लँ) लिखामि पठ माधव पक्षिपत्र ॥ 8॥

योगे न भोगसकलेषु सुखेषु नित्यं(न्),

त्वन्नामधामविषये क्वचिदस्ति दृष्टिः ।

ब्रह्माण्डनाथ तव गौरवसौरभाय,

चेष्टा कदा भवति सा भविता सुबुद्धिः ॥ 9॥